Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 1 | ISSN : 2581- 6306

# आधुनिकसमाजे यागानां प्रासङ्गिकता

**डा.सुधांशुशेखरमहापात्रः**

**सहाचार्यः, धर्मशास्त्रविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।**

**सारांशः –** यागो नाम देवता उद्देश्येन द्रव्यत्यागः। नानाविधफललाभाय यजमानेन यागानुष्ठीयन्ते। स च यागः श्रौतस्मार्त्तभेदेन द्विविधः। श्रौतयागोऽपि त्रिविधः इष्टिः पशुः सोमश्चेति। स्मार्त्तश्च पुनः ऋष्यादि पञ्चमहायज्ञाः। ऋषियज्ञः अथवा ब्रह्मयज्ञः, देवयज्ञः, पितृयज्ञः, नृयज्ञः अथवा अतिथियज्ञः, भूतयज्ञश्चेति। अत्र यज्ञशब्दः यागस्य पर्यायवाच्येव। पुनश्च नित्य नैमित्तिककाम्यभेदेन यागोऽयं त्रिविधः। यथा– सायं प्रातः अग्निहोत्रं जुहुयात्, वसन्ते वसन्ते सोमेन यजेत इत्यादिना विहिताः फलरहिता यागा नित्याः। ब्रह्महत्यादि पाप उपनोदायत्वानुष्ठीयमानाः अश्वमेधादियागा नैमित्तिकाः। वृष्ट्यादिकामेन क्रियमाणाः कारीर्य्यादियागाः काम्या एव इति नास्ति संशयः। तत्र शास्त्रनुसारेण प्रत्यवायनिवारणाय नित्ययागानां, पापानां क्षयाय नैमित्तिक यागानां विविध फललाभाय च काम्ययागानां अनुष्ठानं परम्परया अनादिकालात् लोके प्रवर्त्तते। यद्धवतु एतादृशानां यागानां आधुनिकसमाजे कीदृशी प्रासङ्गिकता अस्ति तद्विषये साम्प्रतम् आलोच्यते।

**मुख्यशब्दाः –** यागानां, यज्ञः, यज्ञार्थं, पञ्चमहायज्ञानाम्।

---

यज् धातोः घञ् प्रत्यये कृते यागशब्दो निष्पद्यते। वेदवोधितइष्टसाधनातको धर्म इति धर्मस्य लक्षणं कुर्वता कृष्णयज्वना यागादिरेव धर्म इति प्रतिपादितम् वस्तुतो यागो नाम देवता उद्देश्येन द्रव्यत्याग इति। यागोऽयं मानसव्यापारः, यः यजमानेन मनसा कल्प्यते। अग्न्यादि देवतामुद्दिश्य यदा कश्चिद् यजमानः घृतादिकं वस्तु त्यजति तदा स मनसि कल्प्यति यत् इदं अग्नये स्वाहा न इदं मम इति। तावता यागः सम्पन्नः। तस्मिन् समये अध्वर्य्युः अग्नये स्वाहा इति मन्त्रं उच्चारयति। होता च स्रुवे विद्यमानं घृतमग्नौ निक्षिपति। तच्च निक्षिप्यमाणं कर्म यागस्य प्रतिपत्तित्वेन होमशब्देन कथ्यते। एतेन यागहोमयोर्मध्ये सामान्यतः भेदो वर्त्तत इति ज्ञायते। अतो यागः यजमानेन फललाभाय क्रियते। ऋत्विजः दक्षिणां प्राप्य तं सम्पादयन्ति। तेन यजनं यजमानस्य धर्मः कर्म च भवति। याजनं तु ब्राह्मणस्य ऋत्विजः कर्म भवति, येन असौ जीविकानिर्वाहं करोति। अत एव नानाविधफललाभाय यजमानेन यागानुष्ठीयन्ते।

स च यागः श्रौतस्मार्त्तभेदेन द्विविधः। अग्निहोत्रदर्शपौर्णमासादयः श्रौतयागोऽपि त्रिविधः इष्टिः पशुः सोमश्चेति। तत्र सायं प्रातः अग्निहोत्रं जुहुयादिति वचनात् प्रत्यहं सायं प्रातश्च नित्यत्वेन अग्नौ हवनं कर्त्तव्यं भवति। ओषधीप्रधानयागः इष्टिः, औषध्यः फलपाकान्ताः इति मनुवचनानुसारेण ओषधीभिः यवब्रीह्यादिभिः पुरोडाशं निर्माय तेन निष्पाद्यमानो यागः इष्टिः। सर्वासां इष्टीनां दर्शपौर्णमासौ प्रकृतिभूतौ। अन्याः सर्वाः आग्रयणेष्टि प्रभृतयः विकृतिभूता भवन्ति। पशोः वपाहृदयादिना अङ्गविशेषेण क्रियमाणो यागः पशुयागः, सर्वेषां पशुयागानां प्रकृतिः अग्निषोमीयपशुयागः एव। अन्ये सर्वे निरुढ पशुबन्धादयो विकृतिभूताः। तदवत् सोमलताकुट्टनद्वारा रसं निष्पाद्य तेन क्रियमाणो यागः सोमयाग इति। सर्वेषां सोमयागानां प्रकृतिः अग्निष्टोमः। अन्ये च अग्निष्टोमादयो विकृतिभूताः परिकल्पिताः स्मार्त्तश्च पुनः ऋष्यादि पञ्चमहायज्ञाः। ऋषियज्ञः अथवा ब्रह्मयज्ञः, देवयज्ञः, पितृयज्ञः, नृयज्ञः अथवा अतिथियज्ञः, भूतयज्ञश्चेति। तत्र ब्रह्मयज्ञो नाम वेदानां अध्ययनं, देवयज्ञनाम

देवतानां पूजनं, पितृयज्ञशब्देन पितृ उद्देश्येन क्रियमाणं श्राद्धं तर्पणादिकञ्च वोध्यते। अतिथियज्ञो नाम अतिथिसत्कारः, भूतयज्ञो नाम बलिवैश्वदेव कर्म इत्यादि। अत्र यज्ञशब्दः यागस्य पर्यायवाच्येव।

द्विविधोऽपि अयं यागः पुनश्च नित्य नैमित्तिककाम्यभेदेन त्रिविधः यस्य अकरणे प्रत्यवायः करणेऽपि फलं न श्रूयते स यागो नित्यः। यथा– सायं प्रातः अग्निहोत्रं जुहुयात्, वसन्ते वसन्ते सोमेन यजेत इत्यादिना विहिताः फलरहिता यागा नित्याः। ब्रह्महत्यादि पाप उपनोदायत्वानुष्ठीयमानाः अश्वमेधादियागा नैमित्तिकाः। वृष्ट्यादिकामेन क्रियमाणाः कारीर्य्यादियागाः काम्या एव इति नास्ति संशयः। एवं प्रकारेण शास्त्रनुसारेण प्रत्यवायनिवारणाय नित्ययागानां, पापानां क्षयाय नैमित्तिक यागानां विविध फललाभाय च काम्ययागानां अनुष्ठानं परम्परया अनादिकालात् लोके प्रवर्त्तते।

यागानाम् उपयोगिताविषये वेदवेदाङ्गादिषु वहु प्रमाणम् उपलभ्यते। वेदाङ्गज्योतिष शास्त्रानुसारेण सर्वेवेदा यज्ञार्थमेव सृष्टाः। अतएव उक्तं [i]तत्र–

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाश्रयास्ते क्रतवो निरुक्ताः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेदसवेद यज्ञम्।। इति।।**

यजुर्वेदे सायणाचार्येण यज्ञो वै श्रेष्ठतमं कर्म इति प्रतिपादितम्। [ii]श्रीमद्भगवत् गीतायां प्रतिपादितं यत्–

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**

**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।। इति।।**

[iii]मनुनाऽपि यज्ञार्थमेव वेदानां उत्पत्तिरिति प्रतिपादितम्। तद्यथा–

**अग्निवायुरिवभ्यस्तु त्रयं ब्रह्म सनातनम्।**

**दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम्।।**

पुनश्च [iv]तेन उक्तं– **स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।**

**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।।**

अतः शरीरस्य संस्कारार्थमपि यज्ञानां आवश्यकता विद्यते। एतावता यज्ञानां महत्ता सम्यक् प्रतिपादिता। यद्यपि धर्मशास्त्रे माहिंस्यात् सर्वभूतानीति वचनात् पशुवधो निषिद्धस्तथापि यज्ञार्थं पशुवधकरणे न दोष इति मनुना साक्षात् प्रतिपादितम्। यथोक्ते [v]तेन स्वस्मृतौ–

**यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः।**

**भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा।।**

पुनश्च यज्ञार्थमेव पशुनां सृष्टिः साक्षादेव ब्रह्मणा कृता। तेन यज्ञार्थं पशुवधः अवध इत्यपि प्रतिपादितम्। [vi]तद्यथा–

**यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा।**

**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः।।**

यदा काले काले यज्ञा अनुष्ठीयन्ते तदा घृताहुतिभ्य समुत्थितो धूमः आकाशे गत्वा मेघं सृजति। मेघश्च वारि वर्षणद्वारा भूमौ अन्नानि सम्भावयति यद् भुक्त्वा प्राणिनः जीवनधारण कुर्वन्ति। एतेन ज्ञायते यत् प्राणिनां जीवनधारणार्थं यज्ञानाम् आवश्यकता काले काले वर्त्तते। प्रसङ्गेऽस्मिन् उक्तं [vii]श्रीमद्भगवतगीतायां यत्–

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।**

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।**

**तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।। इति।।**

अत्र अयम् अभिप्रायो यत् यदि यज्ञानाम् अनुष्ठानं न स्यात् तर्हि वृष्टिर्न सम्भवेत्। येन जगति शस्यमपि सञ्जायेत न वा जना अन्नगत प्राणाः जीवितुमर्हेयुः। अपि च प्रत्यहं पञ्चमहायज्ञानाम् अनुष्ठानाद् जनः विशेषेण सूनादोषग्रस्तो भवति। सूना नाम वधस्थानम्, गृहस्थः स्व गृहे पञ्चसूना स्थापयति, या विना तस्यकर्म कदापि न प्रचलेत्। ताश्च सूनाः का इति जिज्ञासायां [viii]मनुना उक्तं यत्–

**पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।**

**कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।।**

**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।**

**पञ्च क्लृप्ता महायज्ञः प्रत्यहं गृहमेधिनाम्।।**

अर्थात् गृहस्थ स्वगृहे पाकार्थं चुल्ली, पेषणार्थं पेषणी, सम्मार्जनार्थम् उपस्करं, धान्यानां वितुषीकरणार्थं कण्डनी, जलपानार्थं च जलकुम्भं न संस्थाप्य न चलितुम् अर्हतीति हेतोः एतानि गृहस्थस्य गृहे अनिवार्यरूपेण तिष्ठन्ति। परन्तु तेषु प्रत्येकं एकैकं वधस्थान तुल्यं भवति यतो हि तद्द्वारा गृहस्थेन अनिच्छयापि प्राणबधः क्रियते। तस्मात् तत् पापं उपनोदाय गृहस्थः स्वगृहे प्रतिदिनं पञ्चमहायज्ञानाम् अनुष्ठानं कुर्य्यादेव येन सूनादोषेण असौ न लिप्यते। तत्र के तावत् पञ्चमहायज्ञा इति विक्षायां [ix]मनुना प्रतिपादितं यत्–

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**

**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।**

**पञ्चेतान्यो महायज्ञान्न हापयति शक्तितः।**

**सगृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते।।**

अतः प्रतिदिनं पञ्चमहायज्ञानाम् अनुष्ठानस्य महतो उपयोगिता वर्त्तते। पुनश्च यागानां अनुष्ठानकाले वैदिकमन्त्राणाम् उच्चारणं क्रियते। तेन देवानां स्तुतिर्भवति। देवाश्च सन्तुष्टाः फलदा भवति। अतएव ऋग्वेदे अथर्ववेदे च वहुनि सूक्तानि सन्ति। यासु जगतः कल्याणं काम्यते। [x]तद्यथा–

**शन्नो मित्रः शंवरुणः शन्नो भवत्वर्यमा।**

**शन्न इन्द्राबृहस्पतिः शन्नो विष्णुरुरुक्रमः।।**

**शन्नो वातः पवतां शन्न स्तपतु सूर्यः।**

**शन्नः कनिक्रदद् देव पर्जन्योऽभिवर्षतु।। इत्यादि**

परन्तु सम्प्रति भौतिकवादं प्रति आकृष्टा मानवा यागादिकं न अनुतिष्ठन्ति। अतो यागादिनाम् अभावे अद्यत्वे कुत्रचित् अतिवृष्टिः, कुत्रचित् च अनावृष्टिः, क्वचित् जलप्लावनं, गृहदाहः भूकम्पः, चक्रवातादि प्राकृतिक विपर्ययाः सर्वत्र प्रदृश्यन्ते। प्रसङ्गेऽस्मिन् [xi]कालिकापुराणे दृश्यते यत्–

**यज्ञाभावात्तु देवानामन्नं सर्वं क्षयङ्गतम्।**

**पर्जन्यश्च ततो नष्टस्ततो वृष्टिर्न चाभवत्।।**

**वृष्ट्यभावे तु लोकानामाहारः क्षीणतां गतः।**

**दुर्भिक्षे व्यसनोपेते सर्वलोके द्विजोत्तमः।। इति।।**

अतः आधुनिककालेऽपि दर्शपौर्णमासादीनाम् अनुष्ठानं कर्त्तुं न शक्यते चेत् केवलं न्युनातिन्यूनतया जनैरग्निहोत्रं कर्त्तव्यम्। तावताऽपि देवास्तुष्यन्ति। प्रसङ्गेऽस्मिन् [xii]विष्णुधर्मोत्तरपुराणे वर्णितं यत्-

**वह्निदत्तेन हविषा तृप्तिमायान्ति देवताः।**

**तास्तृप्तास्तर्पयन्त्येव नरं सौख्यसमृद्धिभिः।। इति।।**

एवं प्रकारेण साम्प्रतिक समाजे यागानां कियती प्रासङ्गिकता तद्बोद्धुं शक्यते।

**टिप्पणी-**

---

[i].सिद्धान्तशिरोमणिः -वासनाभज्यवार्तिकसहिता, ग्रहगणिताध्यायः, पृ.-11

[ii].श्रीमद्भगवद्गीता- 3/10

[iii].मनुस्मृतिः - 1/23

[iv].मनुस्मृतिः - 2/28

[v].मनुस्मृतिः - 5/22

[vi].मनुस्मृतिः - 5/39

[vii].श्रीमद्भगवद्गीता- 3/14-15

[viii].मनुस्मृतिः - 3/68,69

[ix].मनुस्मृतिः - 3/70,71

[x].कान्वसंहिता- 36/1/9,10

[xi].कालिकापुराणम्- 20/115,116

[xii].विष्णुधर्मोत्तरपुराणम्, अध्यायः- 287, श्लोकः - 7

**सन्दर्भग्रन्थसूची-**


मनुस्मृतिः - मन्वर्थमुक्तावलीसहिता, मोतिलाल बनारसीदास, दिल्ली, 1990

कान्वसंहिता - चौखम्बा विद्याभवन, वाराणसी, 2002

कालिकापुराणम् - चौखम्बा संस्कृत सीरीज अफिस्, वाराणसी-1, 1972

विष्णुधर्मोत्तरपुराणम् - नाग पब्लिसर, जवाहरनगर, दिल्ली-7, 1985

श्रीमद्भगवद्गीता - गीताप्रेस, गोरखपुर

सिद्धान्तशिरोमणिः - सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, 1981